'वेनाच्छन्दसि' (ग. सू. ८०) इति पठ्यते। कथं भाषायां वैन्यो राजा इति ? छान्दस एवायं प्रमादात् कविभिः प्रयुक्तः। वामरथशब्दः पठ्यते, तस्य कण्वादिवत् कार्यमिष्यते। स्वरं वर्जयित्वा लुगादिकमतिदिश्यते। बहुषु वामरथाः। स्त्री वामरथी। वामरथ्यायनी। युवा वामरथ्यायनः। वामरथ्यस्य छात्राः वामरथाः। वामरथानि सङ्घाङ्कलक्षणानि। स्वरस्तु [1]ण्यप्रत्ययस्यैव भवति, नातिदेशिकमाद्युदात्तत्वम्।

कुरु। [2]गर्ग। मङ्गुष। [3]अजमारक। रथकार[4]। वावदूक। 'सम्राजः क्षत्रिये' (ग. सू. ७९)। कवि। मति। वाक्। पितृमत्। इन्द्रजालि। [5]दामोष्णीषि। गणकारि। कैशोरि। कापिञ्जलादि। कुट। शलाका। [6]मुर। एरक। अभ्र। दर्भ। केशिनी। 'वेनाच्छन्दसि' (ग. सू. ८०)। [7]शूर्पणाय। [8]श्यावनाय। श्यावरथ। श्यावपुत्र। सत्यङ्कार। [9]वडभीकार। शङ्कु। शाक। पथिकारिन्। मूढ। शकन्धु। कर्तृ। [10]हर्तृ। शाकिन्। इनपिण्डी। वामरथस्य कण्वादिवत् स्वरवर्जम्॥

## सेनान्तलक्षणकारिभ्यश्च। (१५२/११७६)

सेनान्तात् प्रातिपदिकात् लक्षणशब्दात् कारिवचनेभ्यश्च अपत्ये ण्यः प्रत्ययो भवति। कारिशब्दः कारूणां तन्तुवायादीनां वाचकः। कारिषेण्यः। हारिषेण्यः। लाक्षण्यः। कारिभ्यः – तान्तुवाय्यः। कौम्भकार्यः। नापित्यः॥

## उदीचामिञ्। (१५३/११७७)

ण्ये प्राप्ते इञ्[11]अपरो विधीयते। सेनान्तलक्षणकारिभ्योऽपत्ये इञ् प्रत्ययो भवति उदीचां मतेन। कारिषेणिः। हारिषेणिः। [12]लाक्षणिः। तान्तुवायिः। [13]कौम्भकारिः। वचनसामर्थ्यादेव प्रत्ययसमावेशे लब्धे आचार्यग्रहणं वैचित्र्यार्थम्। तक्षन्शब्दः शिवादिः, तेन अणा अयमिञ् बाध्यते, न तु ण्यः। तक्ष्णोऽपत्यं ताक्ष्णः, [14]ताक्षण्यः॥

## तिकादिभ्यः फिञ्। (१५४/११७८)

तिक इत्येवमादिभ्यः [15]शब्देभ्योऽपत्ये फिञ् प्रत्ययो भवति। तैकायनिः। [16]कैतवायनिः। वृषशब्दोऽत्र पठ्यते, तस्य प्रत्ययसन्नियोगेन [17]यकारान्तत्वमिष्यते। वार्ष्यायणिः। कौरव्यशब्दः पठ्यते, स च [18]क्षत्रियवचनः, औरसशब्देन क्षत्रियप्रत्ययान्तेन साहचर्यात्। यस्तु 'कुर्वादिभ्यो ण्यः' (४.१.१५१/११७५), [19]तदन्ताद् इञेव भवितव्यम्। तथा च 'ण्यक्षत्रियार्षञितो यूनि लुगणिञोः' (२.४.५८/१२७६) [20]इत्यत्र उदाहृतं कौरव्यः पिता, कौरव्यः पुत्रः इति।

तिक। कितव। सञ्ज्ञा। बाल। शिखा। उरस्। [21]शाटच। सैन्धव। यमुन्द। [22]रूप्य। ग्राम्य। नील। अमित्र। गौकक्ष्य। कुरु। देवरथ। तैतिल। औरस। कौरव्य। भौरिकि। भौलिकि। चौपयत। चैतयत। चैटयत। शैकयत। क्षैतयत। ध्वाजवत। चन्द्रमस्। शुभ। [23]गङ्गा। वरेण्य। सुयामन्। आरद। वह्यका। खल्या। वृष। लोमका। उदन्य। यज्ञ॥

---

1. प्रत्ययस्यैव ब. 2. गर्गर ब. 3. अजमार ब. 4. काक स्फोट इत्यधिकम् ब. 5. धातवि ब. 6. मुदापरक ब. 7. शूर्पणरवी ब. 8. श्यावनाय नास्ति ब. 9. बलभीकार ब. 10. हर्तृ नास्ति ब. 11. अपरो नास्ति फ. 12. लाक्षायणिः ब. 13. कौम्भकारिः नास्ति फ. 14. ताक्षण्यः नास्ति फ. 15. शब्देभ्यः नास्ति फ. 16. कैतवायनिः नास्ति फ. 17. यकारान्तता फ. 18. क्षत्रियसर्गः फ. 19. ततः फ. 20. इत्यत्र चैवं फ. 21. शाख्य फ. 22. ऋप्य फ. 23. भङ्गा फ.